एते शान्तमयाः प्रोक्ताः प्रमोदा ये च वै शिवाः। आनन्दाश्च सुखाश्चैव क्षेमकाश्च नरैः सह। वर्णाश्रमाचारयुता देशास्ते सप्त विश्रुताः। आरोग्या बलिनश्चैव सर्वे मरणवर्जिताः। अवसर्पिणी न तेष्वस्ति तथैवोत्सर्पिणी पुनः। न तत्रास्ति युगावस्था चतुर्युगकृता क्वचित्। त्रेतायुगसमः कालस्तथा तत्र प्रवर्त्तते। शाकद्वीपादिषु ज्ञेयं पञ्चस्वेतेषु सर्वशः। देशस्य तु विचारेण कालः स्वाभाविकः स्मृतः। न तेषु सङ्करः कश्चित् वर्णाश्रमकृतः क्वचित्। धर्मस्य चाव्यभीचारादेकान्तसुखिनो जनाः। न तेषु माया लोभो वा ईर्ष्यासूया भयं कुतः। विपर्ययो न तेष्वस्ति तद्वै स्वाभाविकं स्मृतम्। कालो नैव च तेष्वस्ति न दण्डो न च दाण्डिकः। स्वधर्मेण च धर्मज्ञास्ते रक्षन्ति परस्परम्"।

**शाकचुक्रिका** स्त्री शाकेषु मध्ये चुक्रिका। चिञ्चायां राजनि०।

**शाकट** न० शकटाय हितम् अण्। १शकटसम्बन्धियुगादौ २शकटयोढरि च मेदि०। ३श्लेष्मातके वृक्षे राजनि०। ४धवहक्षे च पु० रत्नमा०।

**शाकटायन** पु० व्याकरणकारके मुनिभेदे "इन्द्रश्चन्द्रः काश कृत्स्नापिशली शाकटायनः। पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादिशाब्दिकाः" कविकल्पद्रुमः।

**शाकटिक** पु० शकटेन चरति ठञ्। शकटेन गन्तरि।

**शाकटीन** पु० शकटः परिमाणमस्य खञ्। विंशतितुलापरिमाणे हेमच०। [शाकट्वादयोऽप्यत्र।

**शाकतरु** पु० शाकाख्यः तरुः। ( सेगुण ) वृक्षे शब्दच०।

**शाकपत्त** पु० शाकस्येव पत्रमस्य। शिग्रुवृक्षे राजनि०।

**शाकबालेय** पु० बलये हितम् ढक् शाकप्रधानो बालेयः। ब्रह्मयष्टिकायाम् शब्दच०। [क। तत्रैव त्रिका०।

**शाकबिल्व** पु०शाकोऽपि बिल्व इव। वार्त्ताकौ जटा०स्वार्थे

**शाकम्भरी** स्त्री शाकैर्बिभर्त्ति भृ-खच् मुम् च। "भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः। शाकम्भरीति विख्याति तदा यास्याम्यहं भुवि" देवीमा० निरुक्ता याम् १दुर्गायाम् ।२रोमकान्तर्गतशाकम्भरनगर्यां न० तत्र भवं छ। शाकम्भरीय लवणभेदे न० "शाकम्भरीयं कथितं गडाख्यं रोमकं तथा। गडाख्यं लघु वातघ्नमत्युष्णं भेदि पित्तलम्। तीक्ष्णं व्यवायि सूक्ष्मञ्चाभिष्यन्दि कटुपाकि च" भावप्र०।

**शाकयोग्य** पु० शाके तद्भक्षणे योग्यः। धन्याके राजनि०।

**शाकराज** पु० शाकेषु राजते अच्, शाकानां वा राजा टच् समा०। वास्तूकशाके राजनि०।

**शाकल** पु० ब०व० शकलेन ऋषिणा प्रोक्तमधीयते अण्। १शकलर्षिप्रोक्तकल्पादिग्रन्थाध्येतृषु। तेषां संघोऽङ्को घोषो वा पुनरण् वुञ् वा। शाकल शाकलक वा। १तत्सङ्घे २तदङ्के ३तद्घोषे च पु०। अङ्कः परस्परा सम्बन्धः" सि०कौ०।

**शाकलिक** त्रि० शकलखेदे ठक् कात्या० वार्त्ति०। शकलसम्बन्धिनि पक्षे अण् शाकल तत्रार्थे। [शाके त्रिका०।

**शाकवीर** पु० शाकेषु वीरः वीर्याधायकत्वात्। १वास्तूक-

**शाकशाकट** न० शाकस्य क्षेत्रं शाकटच्। शाकक्षेत्रे। शाकटिनच् शाकशाकटिन अत्रार्थे हेमच०।

**शाकश्रेष्ठ** पु० शाकेषु श्रेष्ठः। १वास्तूकशाके शब्दर०। २जीवन्त्यां ३वार्त्ताकौ स्त्री हेमच०। [कुम्पे राजनि०।

**शाकाङ्ग** न० शाकस्य तद्भक्षणस्याङ्गमुपयोगि। १मरिचे २डोडी-

**शाकाम्ल** न० शाकमेवाम्लम्। वृक्षाम्ले राजनि०।

**शाकाम्लभेदन** न० शाकरूपम् अम्लं भिनत्ति भिद्—ल्यु। १चुक्रे (चुकोपालङ्क) राजनि०। [वृक्षे राजनि०।

**शाकालाबु** स्त्री शाकप्रधानालाबुः। अलाबुभेदे राजालाबु

**शाकाष्टका** स्त्री शाकेन कर्त्तव्या अष्टका। गौणफाल्गुनकृष्णाष्टम्याम् अष्टकाशब्दे ५१६ पृ० दृश्यम्।

**शाकिनी** स्त्री शाकमस्त्यस्याः उत्पद्यत्वेन इनि ।१शाकभवनयोग्यायां भूमौ स्वह्वाटिकायाम् २देवीसहचरीभेदे च। "डाकिनी योगिनी चैव खेचरी शाकिनी तथा। दिक्षु पूज्या इमा देव्यः सर्वसिद्धिफलदायिकाः" कात्या०कल्प०। कण्ठदेशस्थे विशुद्धाख्ये चक्रे स्थितायां ३देवीशक्तौ च "विशुद्धाख्ये महाचक्रे षोडशस्वरसंयुते। सदाशिवं शाकिनीञ्च विन्यसेत् पूर्ववत्ततः" तन्त्रसा०।

**शाकुण** पु० शक—वा० उणन्। परतापके शब्दमा०।

**शाकुन** पु० शकुनं शुभाशुभसूचकं निमित्तमधिकृत्य कृतो ग्रन्थः अण्। शकुनज्ञानसाधने ग्रन्थे (काकचरित)। "शुभाशुभज्ञानविनिर्णयार्थो हेतुर्नृणां यः शकुनः स उक्तः। गतिस्वरालोकनभावचेष्टां संकीर्त्तयाम्यद्विपदादिकानाम्। लोकोऽमुना शाकुनसंज्ञकेन ज्ञानेन विज्ञातसमस्तकर्मा। नापायकूपे पतति प्रसर्पन् शास्त्रं हि दिव्या दृगतीन्द्रियेषु" वसन्तराजः।

**शाकुनिक** पु० शकुनेन पक्षिबधादिना जीवति ठञ्। पक्षिघातके अमरः।